# MP BOARD CLASS 9 EXAM 2014
## संस्कृत (सामान्य) : कक्षा IX

प्रश्न १. उचितविकल्पं चित्वा लिखत— ५

(i) 'सदैव' इत्यस्मिन् पदे सन्धिः अस्ति—
(अ) अयादिसन्धिः (ब) वृद्धिसन्धिः (स) दीर्घसन्धिः (द) विसर्गसन्धिः।

(ii) विसर्ग सन्धेः उदाहरणम् अस्ति—
(अ) पवनः (ब) महेशः (स) मनोरथः (द) वागीशः।

(iii) जगत् + ईशः = ………………… भवति—
(अ) जगतीशः (ब) जगीशः (स) जगदेशः (द) जगदीशः।

(iv) 'परोपकार' एतस्य पदस्य सन्धि-विच्छेदः भवति—
(अ) परा + उपकारः (ब) पर + उपकारः (स) परोप + कारः (द) परो + पकारः।

(v) अधोलिखितेषु अव्ययं अस्ति—
(अ) मीनः (ब) हरिः (स) यदा (द) रमा।

प्रश्न २. (i) 'द्विगु' समासस्य उदाहरणम् अस्ति— १
(अ) त्रिभुवनम् (ब) महात्मा (स) यूपदारुः (द) कृष्णाश्रितः।

(ii) 'पितरौ' इत्यस्य पदस्य समासविग्रहः भवति— १
(अ) माता-पिता (ब) पिता च माता
(स) माता च पिता च (द) माता पिता च।

(iii) 'प्रतिदिनम्' इत्यस्मिन् पदे समासः अस्ति— १
(अ) कर्मधारयसमासः (ब) द्वन्द्वसमासः
(स) बहुव्रीहिसमासः (द) अव्ययीभावसमासः।

(iv) अधोलिखितेषु पदेषु उपसर्गयुक्त पदम् चित्वा लिखत— १
(अ) गच्छामः (ब) मम (स) सम्मानितः (द) गायति।

(v) 'निर्धनः' इत्यस्मिन् पदे उपसर्गः अस्ति— १
(अ) निस् (ब) निर् (स) नि (द) निध्।

प्रश्न ३. (i) 'भवामि' इत्यस्मिन् पदे वचनम् अस्ति— १
(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम्।

(ii) 'पठिष्यन्ति' इत्यस्मिन् पदे पुरुषः अस्ति— १
(अ) प्रथमपुरुषः (ब) मध्यमपुरुष (स) उत्तमपुरुषः।

(iii) 'नयसि' इत्यस्मिन् पदे धातुः अस्ति— १
(अ) नय (ब) नी (स) नम् (द) नस्।

(iv) 'अनमत्' इत्यस्मिन् पदे लकारः अस्ति— १
(अ) लट्लकारः (ब) लृट्लकारः (स) लङ्लकारः (द) लोट्लकारः।

(v) 'विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययं अस्ति— १
(अ) माता (ब) विद्या (स) रक्षति (द) इव।

प्रश्न ४. (i) 'विहस्य' इत्यस्मिन् पदे प्रत्ययः अस्ति— १
(अ) ल्यप् (ब) क्त्वा (स) क्त (द) तुमुन्।

(ii) 'पा + तुमुन्' = ……………… भवति— १
(अ) पतितुम् (ब) पातुम् (स) पततुम् (द) पयतुम्।

(iii) 'क्तवतु' प्रत्ययस्य उदाहरणम् अस्ति— १
(अ) गतवान् (ब) गतः (स) हसितः (द) दर्शनीयम्।

(iv) 'अहम् विद्यालयं गत्वा पठामि' इत्यस्मिन् वाक्ये कृदन्तम् अस्ति— १
(अ) अनीयर् (ब) शतृ (स) शानच् (द) क्त्वा।

(v) सा विद्या या ……………… । १
(अ) युक्तये (ब) विमुक्तये।

प्रश्न ५. प्रदत्तशब्दैः रिक्तस्थानपूर्तिः करणीया— ५
*(दन्तान्, सर्वारम्भाः, बुभुक्षया, पर्वते, समुद्र इव)*

(i) राजकुमारः ……………… पीडित सुप्तवान्।
(ii) गृध्रकूट नाम्नि ……………… पर्कटीवृक्षः अस्ति।
(iii) रामः ……………… गाम्भीर्ये अस्ति।
(iv) रे सिंहशावक जृम्भस्व ……………… ते गणयिष्यामि।
(v) मन्त्रमूलाः ……………… ।

https://www.evidyarthi.in/

प्रश्न ६. निम्नलिखितप्रश्नेषु त्रयाणां उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत— ६

(i) पलभायन्त्रेण कस्य ज्ञानं भवति ?
(ii) आदौ ज्ञानभानु: कुत्र उदित: ?
(iii) राम: कस्मिन् वंशे उत्पन्न: अभूत् ?
(iv) पापात् क: निवारयति ?
(v) जरद्गवनामा गृध्र: कुत्र वसति ?

प्रश्न ७. अधोलिखितशब्दानाम् द्वयो: शब्दयो: रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत— २

(i) राम—द्वितीया विभक्ति:
(ii) मातृ—पंचमी विभक्ति:
(iii) गुरु—प्रथमा विभक्ति:
(iv) फल—चतुर्थी विभक्ति:।

प्रश्न ८. अधोलिखित शब्दानाम् द्वयो: शब्दयो: रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत—२

(i) तत्पुल्लिङ्ग—प्रथमा विभक्ति:
(ii) किम्स्त्रीलिङ्ग—द्वितीया विभक्ति:
(iii) अस्मद्—षष्ठी विभक्ति:
(iv) युष्मद्—सप्तमी विभक्ति:।

प्रश्न ९. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि— १०

(i) कस्मिंश्चिन्नगरे कश्चित् स्वभावकृपण: विप्र: प्रतिवसति स्म। तेन भिक्षार्जितै: भुक्तशेषै: सक्तुभि: कलश: सम्पूरित:। तं च घटं नागदन्ते अवलम्ब्य, तस्याधस्तात् खट्वां निधाय सततम् एकदृष्ट्या तम् अवलोकयति। अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास-यत् अयं घट: सक्तुभि परिपूर्ण: वर्तते। तद्यदि दुर्भिक्षं भवति, तदनेन रूप्यकाणां शतमुत्पत्स्यते। ततस्तेन मया अजाद्वयं ग्रहीतव्यम्।

प्रश्ना:— (अ) विप्र: कुत्र प्रतिवसति स्म ?
(ब) कलश: कै: सम्पूरित: ?
(स) विप्र: एकदृष्ट्या कम् अवलोकयति ?
(द) विप्र: स्वभावेन कीदृश: आसीत् ?
(इ) 'अजाद्वयं ग्रहीतव्यम्' इति क: अचिन्तयत् ?

(ii) कश्चित् एक: महान् तपस्वी ऋषि: आसीत्। स: लोककल्याणार्थम् अहर्निशं भूतले भ्रमति स्म। एकदा स: परिभ्रमन् एक ग्रामम् अगच्छत्। ग्रामस्य एकस्मिन् गृहे एक: शुक: पालित: आसीत्। स: शुक: ऋषिं दृष्ट्वा 'मारयतु कुट्टयतु' इति वारं वारम् उच्चै: उक्तवान्। अनन्तरं स: ऋषि: अपरं स्थानम् अगच्छत् तत्रापि एकस्मिन् गृहे शुक: पालित: आसीत्। स: ऋषिं दृष्ट्वा 'सीताराम-सीताराम' इति उक्तवान्।

प्रश्ना:— (अ) ऋषि: किमर्थं भ्रमति स्म ?
(ब) परिभ्रमन् ऋषि: कुत्र अगच्छत् ?
(स) ग्रामस्य एकस्मिन् गृहे क: पालित: आसीत् ?
(द) प्रथम: शुक: किं वदति स्म ?
(इ) अपर: शुक: किं वदति स्म ?

(iii) श्रवणस्य मातु: नाम भाग्यवती पितु: नाम शान्तनु: च आस्ताम्। श्रवण: मातरं पितरं च विहङ्गिकायाम् उपवेश्य स्वस्कन्धे तां धृत्वा तीर्थाटनम् अकारयत्। स: वनात् वनान्तरे भ्रमन् तमसानद्या: तीरं समागत:। संयोगात् अयोध्याया: नृप: दशरथ: आखेटं कुर्वन् सैनिकै: वियुक्त: मार्गात् भ्रष्ट: तत्रैव वनमागत:। तदैव श्रवण: पित्रौ: पिपासाशमनार्थं वारि आनेतुं तमसातीरं जगाम्।

प्रश्ना:— (अ) श्रवणस्य मातु: नाम किम् ?
(ब) श्रवणस्य पितु: नाम किम् ?
(स) श्रवण: वनात् वनान्तरे भ्रमन् कुत्र समागत: ?
(द) क: आखेटं कुर्वन् वनमागत: ?
(इ) श्रवण: वारि आनेतुं कुत्र गत: ?

प्रश्न १०. अधोलिखितपद्यांशेषु द्वयस्य प्रश्नानां उत्तराणि संस्कृतभाषायाम् देयानि— १०

(i) मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम्
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या।

प्रश्ना:— (अ) माता इव का रक्षति ?
(ब) पिता इव कुत्र नियुङ्क्ते ?
(स) कम् अपनीय कान्तेव अभिरमयति विद्या ?
(द) विद्या कां तनोति ?

https://www.evidyarthi.in/

(इ) विद्या का इव भवति ?

(ii) त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्।।

प्रश्नाः— (अ) कुलस्यार्थे किं त्यजेत् ?
(ब) ग्रामस्यार्थे किं त्यजेत् ?
(स) ग्रामं किमर्थं त्यजेत् ?
(द) आत्मार्थे किं त्यजेत् ?
(इ) 'कुलस्यार्थे' इति पदस्य सन्धिविच्छेदः कुरुत।

(iii) अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्म समुद्भवः।।

प्रश्नाः— (अ) भूतानि कस्मात् भवन्ति ?
(ब) पर्जन्यात् किं भवति ?
(स) यज्ञात् कः भवति ?
(द) कर्म समुद्भवः कः भवति ?
(इ) यज्ञात् इति पदस्य विभक्तिं वचनञ्च लिखत।

प्रश्न ११. उचित युग्ममेलनं कुरुत (केचित् चत्वारः)— ४

| | | |
|---|---|---|
| (i) | वाल्मीकिः | (अ) रामः |
| (ii) | क्रोधसमो | (ब) रामायणं |
| (iii) | कौशल्यानन्दवर्धनः | (स) वालस्य माता |
| (iv) | कर्पूरतिलकः | (द) रिपुः |
| (v) | शकुन्तला | (इ) हस्ती |

प्रश्न १२. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत (केचित् चत्वारः)— ४

(i) आरुणिः महान् पितृभक्तः आसीत्।
(ii) रामः रावणं न हतवान्।
(iii) गोपालः गीतायाः गाता।
(iv) कर्तव्यपालनमेव देशस्य समुन्नतेः मूलमन्त्रः।
(v) चम्पा स्वभागस्य रोटिकां स्वानुजं ददाति स्म।

प्रश्न १३. निम्नलिखितेषु चतुर्णां प्रश्नानां उत्तराणि संस्कृतभाषायां एकपदेन लिखत— ४

(i) मदनविनोदः कस्य पुत्रः आसीत् ?
(ii) हस्ती कुत्र निपतितः ?
(iii) कुण्डलस्य पुत्रस्य नाम किम् ?
(iv) चवर्णं कथं कुर्यात् ?
(v) अष्टमूर्तिः कुत्र प्रतिष्ठापिता अस्ति।
(vi) सीमान्तरक्षकः कः अस्ति ?

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वस्य प्राचार्यस्य कृते पञ्चदिवसानाम् अवकाशार्थं प्रार्थनापत्रं संस्कृते लिखत। ४

*अथवा*

स्वस्य मित्रस्य कृते पत्रं लिखत।

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया— ५

(i) महेशः फलाय खादति।
(ii) रमा कन्दुकं क्रीडति।
(iii) ईश्वरं नमः।
(iv) वृक्षे पत्रं पतति।
(v) अहम् रामं दासोऽस्मि।
(vi) गणेशः मोदकं रोचते।

प्रश्न १७. अधोलिखितेषु वाक्यानां क्रमसंयोजनं कुरुत— ५

(i) शयाने तस्मिन् प्रवाहं विरराम।
(ii) स तत्र संविवेश केदारखण्डे।

https://www.evidyarthi.in/

(iii) तदभिवादये भवन्ताम्।
(iv) गुरुजनानामाज्ञा पालनीया।
(v) तस्य शिष्य: आसीत् आरुणिरिति।

**प्रश्न १८. अधोलिखितगद्यांशं सम्यक् पठित्वा संस्कृतभाषायां प्रश्नानां उत्तराणि लिखत—** ५

**स्वस्थ शरीरे एव स्वस्था बुद्धि: वसति। स्वस्था बुद्धि: एव स्वस्थ विचाराणां जननी अस्ति। व्यायामशील: मनुष्य: एव निरोग: चिरंजीवी च भवति। व्यायामशीला: मनुष्या: प्रायेण रुग्णा: न भवन्ति। विविधरोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अत: जीवनस्य कृते व्यायाम: परमावश्यक:।**

(i) अस्य गद्यांशस्य शीर्षकं लिखत।
(ii) स्वस्था बुद्धि: कुत्र वसति ?
(iii) क: एव निरोग: ?
(iv) विविधरोगाणां चिकित्सा केन सम्भवति ?
(v) जीवनस्य कृते क: परमावश्यक: ?

**प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत—** १०

(i) उद्यानम्, (ii) विद्या, (iii) मम पाठशाला, (iv) पुस्तकम्।

---

## उत्तर

| | | | | | |
|---|---|---|---|---|---|
| १. | (i) (ब), | (ii) (स), | (iii) (द), | (iv) (ब), | (v) (स)। |
| २. | (i) (अ), | (ii) (स), | (iii) (द), | (iv) (स), | (v) (ब)। |
| ३. | (i) (अ), | (ii) (अ), | (iii) (ब), | (iv) (स), | (v) (द)। |
| ४. | (i) (अ), | (ii) (ब), | (iii) (अ), | (iv) (द), | (v) (ब)। |
| ५. | (i) बुभुक्षया, | (ii) पर्वते, | (iii) समुद्र इव, | (iv) दन्तान्, | (v) सर्वारम्भा:। |

| | | | | |
|---|---|---|---|---|
| ७. | (i) रामम् | रामौ | रामान्। |
| | (ii) मातु: | मातृभ्याम् | मातृभ्य:। |
| | (iii) गुरु: | गुरू | गुरव: |
| | (iv) फलाय | फलाभ्याम् | फलेभ्य:। |
| ८. | (i) स: | तौ | ते। |
| | (ii) काम् | के | का:। |
| | (iii) मम | आवयो: | अस्माकम्। |
| | (iv) त्वयि | युवयो: | युष्मासु। |

११. (i) → (ब), (ii) → (द), (iii) → (अ), (iv) → (इ), (v) → (स)।
१२. (i) न, (ii) न, (iii) आम्, (iv) आम्, (v) आम्।
१३. (i) हरिदत्तस्य, (ii) महापङ्के, (iii) सुकर्मा, (iv) अजवत्, (v) दशपुरे, (vi) सावहित:।
१७. (v) → (ii) → (i) → (iii) → (iv)।

https://www.evidyarthi.in/